"पाकस्य मा कौरयाणः" ऋ० ८।३।२१ तद्भाष्ये तथार्थोक्तेः

**कौरव** पुंस्त्री० कुरोरपत्यादि उत्सा० अञ् तद्देशस्य राजा अण् तेषु भवो वा अण्। १कुरुवंश्ये "तस्यान्ववायः सुमहान् यस्य नाम्ना स्म कौरवाः। कुरोस्तु पुत्राश्चत्वारः" हरिवं ६२अ०। २तद्देशन्टपे पु० ३कुरुसम्बन्धिनि ४तद्देशभवे च त्रि०। स्त्रियां ङीप्। "द्रुपदः कौरवान् दृष्ट्वा प्राधावत समन्ततः। शरजालेन महता मोहयन् कौरवीं चमूम्" भा० आ० १३८अ० "क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः" मेघदूतम्।

**कौरवक** त्रि० कुरौ तद्वंशे जातादि "विभाषा कुरुयुगन्धराभ्याम्" पा० वा वुञ्। १कुरुवंशोद्भवे। कुरवकस्येदमण्। २कुरवकसम्बन्धिनि

**कौरवायणि** पुंस्त्री कुरोरपत्यम् तिका० फिञ्। कुरुवंश्ये

**कौरवेय** पुंस्त्री कुरोपत्यं बा० ढक्। कुरुवंशेत्र। "समा हि कौरवेयाणां वयं ते चैव पुत्रक!" भा० आ० १४२अ०। "विमोक्ष्यन्ति विषं क्रुद्धाः कौरवेयेषु भारत!" भा० व० ८अ०।

**कौरव्य** पुंस्त्री० कुरोरपत्यम् कुर्व्वादि० ण्य। १कुरुवंशेत्र। "कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलम्" वेणीसं०। तस्यापत्यं तिका० फिञ। कौरव्यायणि कुरुकुलोत्पन्ने ब्राह्मणादावपत्ये पुंस्त्री कुरूणां राजा ण्य। २कौरव्य कुरुदेशराजे। स्त्रियां ङीप् कौरवी स्त्री। ण्यान्तत्वात् यून्यपत्ये फिञो लुक्। कौरव्यः पिता पुत्रश्च सि० कौ०।

**कौरुकत्य** पुंस्त्री कुरुकतस्यर्षेरपत्यम् गर्गा० यञ्। कुरुकतस्यर्षेरपत्ये युवापत्ये फिञ्। कौरुकत्यायनि तदीय युवापत्ये पुंस्त्री

**कौरुज(जा)ङ्गल** त्रि० कुरुजङ्गले जातादि अण् उत्तरपदस्य वा वृद्धिः। कुरुजङ्गलभवे

**कौरुपाञ्चाल** त्रि० कुरुपञ्चालदेशे प्रसिद्धः अण् उभयपद वृद्धिः। कुरुषु पञ्चालेषु च प्रसिद्धे। "प्रज्ञातं कौरुपाञ्चालं यज्ञतरवत्तम्" शत०ब्रा० १,७,२,८, कौरुपाञ्चालो वा अयं ब्रह्मा ११।४।१।२।

**कौर्प्य** पु० "क्रियतावुरिजित्तमकुलीरलेयपाथेययूककौर्पाख्याः। तौक्षिकआकोकेरो हृद्रोगश्चान्त्यभं चेत्थम्" दीपिकोक्ते वृश्चिकराशौ।

**कौर्म्म** न०कूर्म्ममधिकृत्य कृतो ग्रन्थोः अण्, कूर्म्मस्येदम् अण् वा। १कूर्म्मपुराणे २कूर्म्मसम्बन्धिनि त्रि०।

**कौल** त्रि० कुले भवः इभिन्नः अण्। सत्कुलभवे १कुलीने पुंसि तु कौलेयक इत्येव। कुले कुलाचारे रतः तं वेत्ति वा अण्। २तन्त्रोक्तकुलाचाररते ३तदाचारवेदिनि च। "दिव्यभावरतः कौलः सर्वत्र समदर्शनः" कुलार्णवः। 'पशोर्वक्त्राल्लब्धमन्त्रः पशुरेव न संशयः। वीराल्लब्धमनुर्वीरः कौलाच्च ब्रह्मविद्भवेत्" महानीलतन्त्रम्। कुलं कुलाचारमधिकृत्य कृतो ग्रन्थः अण्। ४कुलाचारप्रवर्त्तके ग्रन्थे कौलोपनिषदादौ।

**कौलक** त्रि० कूले भवः सौवीरः धूमा०वुञ्। कूलभवे सौवीरे

**कौलकेय** त्रि० कुले सत्कुले भवः बा० ठक् कुक् च। १सत्कुलोद्भवे। कौलटेय+पृषो०। २असतीपुत्रे पुंस्त्री शब्दरत्ना०

**कौलटिनेय** पुंस्त्री भिक्षुक्याः सत्या अपत्यम् ढक् इनादेशश्च। सत्या भिक्षुक्याः अपत्ये अमरः स्त्रियां ङीप्

**कौलटेय** पुंस्त्री कुलटायाः सत्याः असत्या वा अपत्यम् ढक्। सत्याः असत्याश्च भिक्षुक्याः अपत्ये अमरः। स्त्रियां ङीप्।

**कौलटेर** पुंस्त्री कुलटायाः असत्या अपत्यम् आचारेण क्षुद्रत्वात् ("क्षुद्राभ्यः") पा० ढ्रक्। बन्धक्याः अपत्ये अमरः।

**कौलत्थ** त्रि० कुलत्थेन संस्कृतम् अण्। कुलत्थसंस्कृते "पाययेच्चाम्लकौलत्थसुरासौवीरकादिभिः" सुश्रु०।

**कौलत्थीन** न० कुलत्थस्य भवनं क्षेत्रम् खञ्। कुलत्थोत्पत्तियोग्ये क्षेत्रे

**कौलपुत्रक** न० कुलपुत्रस्य भावः मनोज्ञा० वुञ्। कुलपुत्रभावे

**कौलव** पु० ववादिषु तृतीये तिथ्यर्द्धरूपे चरकरणभेदे। करणशब्दे १६६०० पृ० विवृतिः

**कौलालक** त्रि० कुलालेन कृतं संज्ञायां वुञ्। कुलालकृते शरावादौ असंज्ञायान्तु अण् कौलाल तत्कृते। तस्येदमण् कौलाल तद्सम्बन्धिनि त्रि० "रथचक्रं वा कौलालचक्रं वा" शत० ब्रा० ११।८।४।१

**कौलिक** त्रि०कुलादागतः ठक्। १कुलपरम्परागते आचारादौ। कुले कुलागमे सिद्धः ठक्। तन्त्रोक्ते २कुलाचारे। कौलं कुलधर्मं प्रवर्त्तयति ठक्। ३कुलधर्मप्रवर्त्तके शिवे। शब्दमा०। ४पाषण्डे त्रिका०। कुलं तदाचारः प्रयोजनमस्य ठक्। ५कौले ब्रह्मविदि "शस्त्रः कौलिकः" स्मृतिः

**कौलितर** पु० कुलितरस्यापत्यम् ऋष्यण्। शम्बरासुरे "उत दासं कौलितरं बृहतः पर्व्वतादधि। अवाहन्निन्द्र शम्बरम्" ऋ०४।३।०१४ कुलितरनाम्नोऽपत्यं शम्बरमसुरम्" भा०

**कौलिशायनि** त्रि०कुलिश+चतुरर्थ्यां कर्णा० फिञ्। कुलिशसन्निकृष्टदेशादौ